|| श्री महागणपतये नमः ||
Indian Astrology Source
www.astrovidya.com

## अथ शनि कवचं

ओं अस्य श्री शनैश्चर कवच महामंत्रस्य काश्यप ऋषिः। अनुष्टुप्छंदः। शनैश्चरो देवता। शं बीजं। वां शक्तिः। यं कीलकं। मम शनैश्चर प्रसाद सिद्ध्यर्थे जपे विनियोगः॥ (करन्यासः) शां अंगुष्ठाभ्यां नमः। शीं तर्जनीभ्यां नमः। शूं मध्यमाभ्यां नमः। शैं अनामिकाभ्यां नमः। शौं कनिष्ठिकाभ्यां नमः। शः करतलकरपृष्ठाभ्यां नमः॥ (अंगन्यासः) शां हृदयाय नमः। शीं शिरसे स्वाहा। शूं शिखायै वषट्। शैं कवचाय हुं। शौं नेत्रत्रयाय वौषट्। शः अस्त्राय फट्। भूर्भुवस्सुवरोमिति दिग्भंधः॥ (ध्यानं) चतुर्भुजं शनिं देवं चापतूणी कृपाणकं। वरदं भीमदंष्ट्रं च नीलांगं वरभूषणं। नीलमाल्यानुलेपनं च नीलरत्नैरलंकृतं। ज्वालोर्ध्व मकुटाभासं नीलगृध्र रथावहं। मेरु प्रदक्षिणं कृत्वा सर्वलोकभयावहं। कृष्णांबरधरं देवं द्विभुजं गृध्रसंस्थितं। सर्वपीडाहरं नृणां ध्यायेद्ग्रहगणोत्तमम्॥ (अथ कवचं) शनैश्चर शिरोरक्षेत् मुखं भक्तार्तिनाशनः। कर्णौ कृष्णांबरः पातु नेत्रे सर्वभयंकरः। कृष्णांगो नासिकां रक्षेत्कर्णं मे च शिखंडिजः। भुजौ मे सुभुजः पातु हस्तौ नीलोत्पलप्रदः। पातु मे हृदयं कृष्णः कुक्षिं शुष्कोदरस्तथा। कटिं मे विकटः पातु ऊरू मे घोररूपवान्। जानुनी पातु दीर्घो जंघे मे मंगळप्रदः। गुल्फौ गुणाकरः पातु पादौ मे पंगुपादकः। सर्वाणि च ममांगानि पातु भास्करनंदनः। (फलश्रुतिः) य इदं कवचं दिव्यं सर्वपीडांहरं नृणां। पठति श्रद्धयायुक्त सर्वान् कामान् वाप्नुयात्॥ इति श्रीपद्म पुराणे शनैश्चर कवचं॥

For Qualitative Predictions & Potential Remedies visit:
www.astrovidya.com